A-I/2/1259/22

प्रथमसत्रार्द्धम्

द्वितीयपत्रम्

सिद्धान्तज्योतिषम्

समय: घण्टात्रयम् पूर्णाङ्का: 80

अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:। (15×2=30)

1. मध्यरेखायां के देशा: सन्ति?

2. असुरगणा: फणिनश्च कुत्र वसन्ति?

3. केषां मुखरङ्गे भारती नृत्यति?

**अथवा**

कुमेरु: कुत्र स्थित: अस्ति?

4. भूमि: किमाकारा?

5. दक्षिणध्रुवे स्थिता: जना: भचक्रं कस्यां दिशि भ्रमत् पश्यन्ति?

6. परमक्रान्त्यंशमानं किम्?

**अथवा**

सृष्टे: लय: कदा भवति?

7. का नाम द्युज्या?

8. पितृणां रात्रि: कदा भवति?

9. भास्करमतेन भूपरिधिमानं किम्?

**अथवा**

का नाम अन्त्यफलज्या?

10. को नाम पात:?

11. किं नाम लग्नम्?

12. उच्चस्थितस्य ग्रहस्य बिम्ब: अणु: अथवा पृथुल: दृश्यते?

**अथवा**

(मध्यभूपरिधि: × लम्बज्या) ÷ त्रिज्या = किम्?

13. लम्बांशा: कस्मिन् वृत्ते भवन्ति?

14. का नाम हृतिः ?

15. शीघ्रफलं मन्दफलं वा कीदृक्केन्द्रे ऋणं भवति ?

**अथवा**

अहर्गणः मध्यमसावनेन कथं साध्यते ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. भूमेः प्रलयभेदान् सप्रमाणं स्पष्टयत।

17. चरानयनं सप्रमाणं स्पष्टयत।

**अथवा**

देशान्तरसाधनं सप्रमाणं सोपपत्तिकं निरूपयत।

18. उदयान्तवासना सप्रमाणम् उपस्थापनीया।

19. भास्करोक्तां दिग्व्यवस्थां स्पष्टयत।

**अथवा**

ग्रन्थदिशा नतकर्म स्पष्टयत।

20. पितृदिवसस्य उदयास्तादिकालान् सप्रमाणं स्पष्टयत।

**अथवा**

भपञ्जरस्य भ्रमणावलोकनविषये बौद्धानां युक्तिं ग्रन्थदिशा प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. यथाग्रन्थं मेरुसंस्थानं वर्णयत।

**अथवा**

ग्रन्थदिशा नतिसाधनोपपत्तिं लिखत।